## अध्याय :- ३५ chapter-35

नारद उवाच ॥[१]
कुमारेण स्थापितोऽत्र कुमारेशस्ततः सुराः ॥
प्रणम्य गुहमूचुश्च प्रबद्धकरसंपुटाः[२] ॥ १

किंचिद्विज्ञापयिष्यामो वयं त्वां शृणु तत्वतः ॥
पूर्वप्रसिद्ध आचारः प्रोच्यते जयिनामयम् ॥ २

जयंति ये रणे शत्रूंस्तैः कार्यः स्तंभचिह्नकः ॥
तस्मात्तव जयोद्योतनिमित्तं स्तंभमुत्तमम् ॥ ३

निक्षिपाम वयं यावत्त्वमनुज्ञातु मर्हसि ॥
विश्वकर्मकृतं यच्च तृतीयं लिंगमुत्तमम् ॥ ४

तस्य स्तंभाग्रतस्तं च संस्थापय शिवात्मज ॥
एवमुक्ते सुरैः स्कन्दस्तथेत्याह महामनाः ॥ ५

ततो तदष्टाः सुरगणाः शक्राद्याः स्तंभमुत्तमम् ॥
जांबूनदमयं शुभ्रं रणभूमौ विनिक्षिपुः ॥ ६

परितः[३] स्थंडिलं दिक्षु[४] सर्वरत्नमयं तु ते ॥
तत्र हृष्टाश्चाप्सरसो ननृतुर्दशधा शुभाः ॥ ७

---

१ ब. श्री नारद उ० ॥
२ ब. पुटा
३ ब. त
४ ब. क्षुः

मातरो मंगलान्यस्य जगुः स्कन्दस्य नंदिताः ।।
इंद्राद्या ननृतुस्तत्र स्वयं विष्णुश्च वादकः ।। ८

पेतुः खात्पुष्पवर्षाणि देववाद्यानि सस्वनुः ।।
एवं स्तंभं समारोप्य जयाख्यं विश्वनंदकः ।। ९

स्तम्भेश्वरस्ततो देवः स्थापितस्त्रयक्षसूनुना ।।
विरिंचि प्रमुखैर्देवैर्जातानन्दैः समं तदा ।। १०

हरिहरादित्ययुक्तैस्तैः सेन्द्रैर्मुनिगणैरपि ।।
तस्यैव पश्चिमे भागे शक्त्यग्रेण महात्मना ।। ११

गुहेन निर्मितः कूपो गंगा तत्र तलोद्भवा ।।
माघस्य च चतुर्दश्यां कृष्णायां पितृतर्पणम् ।। १२

कूपे स्नानं नरः कृत्वा भक्तया यः पांडुनंदन ।।
गयाश्राद्धेन यत्पुण्यं तत्फलं लभते स्फुटम् ।। १३

स्तंभेश्वरं[१] ततो देवं[२] गन्धपुष्पैः प्रपूजयेत् ।।
वाजपेयफलं प्राप्य मोदते रुद्रसद्मनि ।। १४

---

१ ब. "र"
२ ब. देवः

पौर्णमास्याममावास्यां महीसागरसंगमे ।।
श्राद्धं कृत्वा च यो/भ्यर्च्येत्स्तंभेश्वरम् कल्मषाः ।। १५

पितरस्तस्य तृप्यंति तृप्ता यच्छंति चाशिषाः ।।
स भित्वा सर्वपापानि रुद्रलोके महीयते ।। १६

इत्याह भगवान्रुद्रः स्कन्दस्य प्रीतये पुरा[1] ।।
एवमेव चतुर्थं च स्थापितं लिंगमुत्तमम् ।। १७

प्रणेमुर्देवताः सर्वे साधु साध्विति ते जगुः ।। १८

* २ इति श्री स्कांदे....... स्तंभेश्वर माहात्म्यवर्णनं नाम
पंचत्रिंशो/ध्यायः ।।

---

१ ब. सुरा

* २ ब. इति श्री स्कंद पुराणे कुमारिका खंडे कुमारेश्वर माहात्म्य
पंचत्रिंशो/ध्यायः ।।